# vedAntaparabhAgavataM

# વેદાન્તપરભાગવતમ્

## Document Information

Text title : vedAntaparabhAgavatam

File name : vedAntaparabhAgavatamVS.itx

Category : vishhnu, vAsudevAnanda-sarasvatI, vedanta, krishna

Location : doc_vishhnu

Author : vAsudevAnandasarasvatI TembesvAmi

Proofread by : Sunder Hattangadi

Description-comments : From stotrAdisangraha

Latest update : December 31, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# વેદાન્તપરભાગવતમ્

વસુદેવઃ શુદ્ધસત્ત્વં તદ્વૃત્તિર્દેવકી મતા ।
કૃષ્ણ આત્માऽऽગતસ્તત્ર પિતૃબન્ધવિમોચકઃ ॥ ૧॥

ગોકુલં પ્રાપિતોऽથાપિ દૈવાત્પિત્રેન્દ્રિયાભિધમ્ ।
સવૃત્તિસાત્ત્વિકાત્માખ્યયશોદાનન્દતાતભાક્ ॥ ૨॥

દુર્વાસનાપૂતનાઘ્નો રેમે ગોપ્યાખ્યવૃત્તિભિઃ ।
વિલીય તત્સઞ્ચિતગોરસાદ્ભોગોપપાલકઃ ॥ ૩॥

નાનાકૌતુકકૃદ્દુર્હૃદ્વૃત્તિવૃન્દાવને સ્થિતઃ ।
ગોપ્યાશાપૂરકોऽવિદ્યાનિશાયાં ચિત્રરાસકૃત્ ॥ ૪॥

ગોપ્યોર્દ્વયોર્દ્વયોર્મધ્યે વશસ્તદનુરૂપવત્ ।
રેમે દૈવાત્તદ્વિયુક્તો દુર્હૃત્પ્રાક્પિતૃસઙ્ગતઃ ॥ ૫॥

ભવાબ્ધિમધ્યે દેહાખ્યાં કૃત્વા દ્વારવતીં પુરીમ્ ।
સોऽનુપ્રવિષ્ટસ્તાં તત્ર વૃત્ત્યાખ્યા વિવિધાઃ સ્ત્રિયઃ ॥ ૬॥

સર્વાઃ પતિવ્રતાઃ કાન્તં મેનિરે તં વશીકૃતમ્ ।
આત્મારામોऽપ્યસઙ્ગોऽપિ તતો દીન ઇવાબભૌ ॥ ૭॥

ષોડશસ્ત્રીસહસ્રેશઃ સંસારં સમવર્ધયત્ ।
પરોપદેશકૃત્પઞ્ચપ્રાણપાણ્ડવપાલકઃ ॥ ૮॥

ઉરીકૃત્ય બ્રહ્મશાપં વિનાશ્ય સ્વજનાન્ ક્ષણાત્ ।
પુરીં દ્વારવતીં ચાપિ કૃષ્ણ એકસ્તતઃ સ્વયમ્ ॥ ૯॥

હૃતપાણ્ડવસારોऽગાદ્વૈકુણ્ઠં પૂર્વધામ તત્ ।
ભક્તઃ સુભક્ત્યા ભગવત્સમ્બન્ધીદં સદા પઠેત્ ।
ભવાર્તિહૃદ્ ભાગવતં સ નૂનં ભવભર્જકઃ ॥ ૧૦॥

ઇતિ શ્રી પરમપૂજનીય શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં

વેદાન્તપરભાગવતં સમ્પૂર્ણમ્ ॥

Proofread by Sunder Hattangadi

*vedAntaparabhAgavataM*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*